# NARAJOLE RAJ COLLEGE

subject - Sanskrit Topic – Dhanyaloka
Teacher – Barnali Banerjee

प्रश्नः काव्यस्यात्मा स एवार्थः तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥
इति कारिका व्याख्येया।

उत्तरम्- एषा कारिका आनन्धवर्धनविरचिते ध्वन्यालोके विद्यते । तत्र प्रथमोद्यतात् गृहीता एषा कारिका ।

काव्यस्यात्मा' .......।' इति शब्दार्थशरीरन्तावत्काव्यमिति यत्र काव्यव्यवहारः प्रसिद्धः तत्र शरीरत्वे सतितस्मिन् चैतन्यलावण्यादिप्रतीतौ काव्यस्य आत्मा अपिवक्तव्यमिति, अत एवोच्यते काव्यस्यात्मा इति । काव्यशरीरस्यआत्मतत्त्वं नाम । स एव व्यञ्जनागम्य एव अर्थः । इति सारः । तदेव इतिहाससंश्रयेण स्फोटयति-तथा चादिकवेः पुरा ।क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः इति । पुराआदिकविर्वाल्मीकिः नित्यकर्मनिवृत्तये गच्छन् केनचित् व्याधेनव्यापाद्यमान क्रौच्चद्वन्द्वमध्ये एकं ददर्श, तदैव अपरया क्रौञ्च्यावियोगजन्यकरुणस्थायिभावं शोकं सहृदयतयाऽसह्यमान सहसाव्याधं शशाप

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ इति ॥

तदेव लौकिकसाहित्यस्यादिभूतं अनुष्टुब्छन्दानुबद्ध सहसास्फुरितं काव्यरत्नमवबुध्य चकितः सञ्जात इत्येव 'तथा विशेषोचादिकवेः पुरा' इत्यादिवाक्येन प्रकाशितः । अभिधा अत्र मिथुनमध्ये सहायभूतस्वसहचराद् वियोगमसहमानाया एव वक्रौञ्च्या यत् शोकाभिधः स्थायिभावः करुणरसे प्रवर्तितः तदेव वाच्यतासहृदयतया आदिकविनाऽनुभूतः इति कवेः साधारणी- वा इत्यकरणवृत्त्यानुभूतः । तत्र क्रौञ्च्या शोक एव कविना शृङ्गारासाधारणीकृतं तत् साधारणीकरणस्तु व्यञ्जनावृत्त्या एव शृङ्गारा सम्भवति न तु तत्र वाचकव्यञ्जकशब्दाभावे कथं इति व्यञ्जनाशक्तिरवगन्तव्या इति वक्तव्यम् । व्यञ्जनावृत्तिस्तु सत्यपि कञ्चित् सङ्केतमेवाधारीकृत्य प्रस्फुरति । इति काव्यस्यात्मा स विभावा एवार्थः । इति वाक्येन प्रतीयते ।

ध्वनिकारेण प्रथममेवोक्तं प्रतीयमानमित्यादिना -

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति बाणीषु महाकवीनाम् ।
यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाहनासु ।।

अर्थात्-शब्दार्थशरीरं तावत् काव्यं तत्र शब्दार्थौ काव्य शरीरम् । अलङ्कारास्तु हारादय इव, गुणा शौर्यौदार्यादय इव, रीतय अपि संघटनाविशेषवत् । एवं काव्यशरीरे व्याख्याते सति तत्र आत्मा अपि वक्तव्यमिति चेत् आत्मा तु ध्वनिरेव ।अत्र स् एव इत्यनेन न केवलं रसध्वनि एवं अपितु ध्वनिमा ग्राह्यम् । स इत्यनेन 'प्रतीयमानं पुनरन्यदेव' इति कारिकातः । प्रतीयमानमेव अर्थ स्वीकर्तव्यम् । एव इति मात्रशब्दवाच्यः । तेन 'तत्र वाच्यः प्रसिद्धी यः' इति कारिकायामुक्तस्य वाच्यस्य निवृत्तिः । तथा च प्रसिद्धावयवातिरिक्तम् इत्यनेन शब्दार्थरीतिगुणालङ्कारौचित्यादीनामपि निवृत्तिः । सत्यपि रीतिगुणालङ्कारवक्रोक्त्यादिषु कामिन्या लावण्यमिव काव्यस्य ध्वनिरेव चमत्कृतिविशेष इत्यलं विस्तरेण ।

प्रश्नः यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यक्तः काव्यविशेषः स ध्वनिरिति
सूरिभिः कथितः ॥
इति कारिका सविस्तरं व्याख्येया ।

उत्तरम्-

एषा कारिका आनन्धवर्धनविरचिते ध्वन्यालोके विद्यते । तत्र प्रथमोद्यतात् गृहीता एषा कारिका ।

ग्रन्थारम्भे रचनाप्रयोजनं निर्दिशति'तेन ब्रूमः सहृदयमनःप्रीतये तत्सस्वरूपम्' ' इति यदुक्तं तदेव प्रतिज्ञापूर्तिहेतौ वाच्यार्थाद् भिन्नार्थयावश्यकतां निर्दिश्य सम्प्रति ध्वनेः स्वरूपं प्रतिदयति-यत्रार्थ इति ।

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थो ।
व्यक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥ इति ॥

अर्थात्- यत्र = यस्मिन् काव्ये, वाक्ये, रचनायां वा, अर्थः शब्दो वा वाच्यः वाचको वा उपसर्जनी

*कृतस्वार्थी- उपसर्जनीकृतः = गौणीकृतः, स्वात्मा = वाचकः अर्थश्च = वाच्यश्च येन सः तमर्थम् = वाच्यभिन्नमर्थम्, प्रतीयमानं पुनरन्यदेव इत्यनया कारिकयाऽभिहितं प्रतीयमानार्थम् व्यंक्तः = प्रतीतिविषयीकृतः स = काव्यविशेषः, ध्वनिरिति = ध्वनिनामधेयः, सूरिभिः = बुधैःवैयाकरणैः, काव्यतत्त्वविद्भिः वा कथितः = अभिहितः । शब्दार्थाविति-स्वश्च अर्थश्च इति स्वार्थौ । वाच्यवाचकौव्यंग्यार्थोपकारकत्वात् गुणीकृत्य व्यंग्यार्थं बोधयतः इत्यत्र तात्पर्यः पर्यवसितः । शब्दश्चार्थश्च व्यंग्यार्थं बोधयत इति ग्रन्थकर्तुराशयः । स्वार्थौ अप्रधानं कृत्वा इति 'अप्रधानोपसर्जने' इत्यमरः । तदुक्तं साहित्यदर्पणे -*

*शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यन्तिराश्रयः ।*
*एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥ इति ।*

सूरिभिरिति–सूरिभिः कथितः वैयाकरणैरुक्तः इत्यर्थः ।व्याकरणस्य सर्वविद्यामूलत्वात् सूरिभिः इत्यनेन वैयाकरणैरित्येवार्थः पर्यवसितः । तेन व्याकरणानुसारं ध्वनिशब्दस्य एकाधिका अर्था पर्यवसिताः-'ध्वनतीति ध्वनिः' इत्यनेन वाच्यवाचकौ 'ध्वन्यते इति ध्वनिः' इत्यनेन व्यंग्यार्थः ध्वननं ध्वनिः इत्यनेन व्यञ्जनाव्यापारः 'ध्वन्यतेऽस्मिन् इति ध्वनिः इत्यनेन काव्यविशेषः ध्वनिरित्युच्यते ।

## प्रश्नः 205. रसादीनां व्यङ्ग्यत्वं प्रतिपाद्यताम् ।

उत्तरम्- रसादयस्तु रसभाव-रसाभास-भावाभास-भावशान्तिभावोदय-भावसन्धि-भावशबलताः । ते रसादयस्तु कदापि वाच्या न भवन्तीति ध्वनिकारः । तस्यार्थः रसादीनां प्रतीतिः तु कदापि अभिधाशक्त्या न भवति । शक्तयस्तु अभिधा-लक्षणातात्पर्या-व्यञ्जनाः । तत्र रसादीनां प्रतीतिः नैवाभिधामुखेन न च व्यञ्जनातात्पर्येऽत्र समर्थौ भवतः । रसादयस्तु न स्वशब्दवाच्या । न हि कदापि रसादयः रसो रस इत्यादि शब्दैः न वा शृङ्गारः शृङ्गार इत्यादिभिः वाच्या । सत्यपि रसादीनामुल्लेखे न तैः रसादिप्रतीतिः । रसादीनां प्रतीतिस्तु विभावादिमुखेनैव भवति ।

तत्र अन्वयव्यतिरेको प्रदर्येते-तत्सत्त्वे तत्सत्त्वमन्वयः, तदभावे तदभावः व्यतिरेकः ।

यत्न यत्र विभावादयः तत्र तत्र रसादिप्रतीतिः इत्यन्वयः, यत्रन्यत्र विभावाद्यभावः तत्र तत्र रसाद्यभावः इति व्यतिरेकः । न हि विभावाद्यभावेन रसादिप्रतीतिः । तदेवोच्यते तृतीयेत्यादिः । तस्यार्थः-रसादिरूपध्वनिभेदविशेषो वाच्यसामर्थ्याक्षिप्त सदेव प्रकाशते । न तु अभिधालक्षणातात्पर्यादिभिः साक्षाद् विषयतां गच्छति । अतएव वाच्याद्भिन्न एव । यतः तस्य वाच्यत्व-कल्पनायां वाच्यता भेदद्वयेन सम्भाव्यते-स्वशब्दैः-रसादिभिः शृङ्गारादिभिः वा इत्येकः पक्षः विभावादिभिर्वा इत्यपरः । तत्र रसादिभिः शृङ्गारादिभिर्वा नैव कदापि रसादिप्रतीतिः । सत्यपि रसादिशृङ्गारादिप्रयोगः विभावादिविरहे न रसादि-प्रतीतिः सम्भवति इति लोकव्यवहारसिद्ध एव । अपरतश्च विभावादिप्रयोगे सत्यपि रसादिप्रयोगाभावेऽपि रसादिप्रतीतिः । तथा च यत्र विभावादिप्रयोग अस्ति तत्र यदि रसादिशृङ्गारादीनामपि प्रयोगः दृश्यते, तत्रापि विभावादिभिरेव रसादिप्रतीतिः रसादिशृङ्गारादिशब्दैस्तु तदनूद्यते एव । न तु प्रकाशते । तदेवोच्यते ध्वनिकारैः-यत इति । 'यतश्च स्वाभिधानमन्तरेण केवलेभ्योऽपि विभावादिभ्यो विशिष्टेभ्यो रसादीनां प्रतीतिः ।केवलाश्च स्वाभिधानादप्रतीतिः । तदन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसादीनाम् । न त्वभिधेयत्वं कथञ्चित् ।'

* This note has written by gathering informations from various secondery sources for the sake of students' welfare .